# श्रीभक्तिरसामृतसिन्धुबिन्दुः

## मङ्गलाचरणम्

अखिलरसामृतमूर्तिः प्रसृमररुचिरुद्धतारकापालिः।
कलितश्यामाललितो राधाप्रेयान् विधुर्जयति।।

## उत्तमा भक्तिः

अन्याभिलाषिता शून्यं ज्ञानकर्माद्यनावृतम्।
आनुकूल्येन कृष्णानुशीलनं भक्तिरुत्तमा।।

अस्यार्थः—अन्याभिलाषज्ञानकर्मादिरहिता श्रीकृष्णमुद्दिश्यानुकूल्येन कायवाङ्मनोभिर्यावती क्रिया सा भक्तिः।

अथ तस्या लक्षणं वदन्नेव ग्रन्थमारभते अन्येति। यथा क्रियाशब्देन धात्वर्थमात्रमुच्यते, तथात्रानुशीलनशब्देनापि धात्वर्थमात्रमुच्यते। धात्वर्थश्च द्विविधः—प्रवृत्तिनिवृत्त्यात्मकः। तत्र प्रवृत्त्यात्मको धात्वर्थस्तु कायवाङ्मानसमयस्तच्चेष्टारूपः। निवृत्त्यात्मकधात्वर्थश्च प्रवृत्तिभिन्नः। सेवानामापराधानामुद्भवाभावकारितेत्यादिवचनव्यञ्जितः सेवानामापराधाद्यभावरूपश्च। स च वक्ष्यमाणरतिप्रेमादिस्थायिभावरूपश्च।

तदेवं सति कृष्णसम्बन्धिकृष्णार्थं वा अनुशीलनमिति। तत्सम्बन्धमात्रस्य तदर्थस्य वा विवक्षितत्वाद् गुरुपादाश्रयादौ, भावरूपस्यापि क्रोडीकृतत्वाद् रत्यादिस्थायिनि व्यभिचारिभावेषु च नाव्याप्तिः।

एतच्च कृष्णतद्भक्तकृपयैवलभ्यं श्रीभगवतः स्वरूपशक्तिवृत्तिरूपमपि कायादिवृत्तितादात्म्येनाविर्भूतमिति ज्ञेयम्। अग्रे तु स्पष्टीकरिष्यते। कृष्णशब्दश्चात्र स्वयंभगवतः कृष्णस्य तद्रूपाणां चान्येषामवताराणां ग्राहकः। तारतम्यमग्रे विवेचनीयाम्।

तत्र भक्तिस्वरूपतासिद्ध्यर्थं विशेषणमाह—आनुकूल्येनेति। प्रातिकूल्ये भक्तित्वाप्रसिद्धेः। आनुकूल्यं चोद्देश्याय श्रीकृष्णाय रोचमाना प्रवृत्तिरित्युक्ते लक्षणेऽतिव्याप्तिरव्याप्तिश्च। तद् यथा—असुरकर्तृकप्रहाररूपानुशीलनं युद्धरसः उत्साहरतिः श्रीकृष्णाय रोचते। यथोक्तं प्रथमस्कन्धे—मनस्विनामिव सन् संप्रहारः ।।भा.पु. १.१३.४०।। इति संप्रहार इति। तथा श्रीकृष्णं विहाय दुग्धरक्षार्थं गतायाः यशोदायास्तादृशानुशीलनं श्रीकृष्णाय न रोचते। यथोक्तं श्रीदशमे—

संजातकोपः स्फुरितारुणाधरम् ।।भा.पु. १०.९.६।। इति। तथा च तत्र तत्रातिव्याप्त्यव्याप्त्योश्च वारणायानुकूल्यानां प्रतिकूल्यशून्यत्वमेव विवक्षणीयम्। एवं सत्यसुरेषु द्वेषरूपप्रातिकूल्यसत्त्वान्नातिव्याप्तिः। एवं यशोदायाः प्रातिकूल्याभावान्नाव्याप्तिरिति बोध्यम्। एतेन विशेषणस्यानुकूल्यस्यैव भक्तित्वमस्तु। भक्तिसामान्यस्यैव कृष्णाय रोचमानत्वाद्विशेष्यस्यानुशीलनपदस्य वैयर्थ्यमित्यपि शङ्का निरस्ता। तादृशप्रातिकूल्याभावमात्रस्य घटेऽपि सत्त्वात्।

उत्तमात्वसिद्ध्यर्थं विशेषणद्वयमाह—अन्याभिलाषिताशून्यमित्यादि। कथम्भूतमनुशीलनम् अन्यस्मिन् भक्त्यातिरिक्ते फलत्वेनाभिलाषशून्यं—भक्त्या सञ्जातया भक्त्या ।।भा.पु. ११.३.३१।। इत्येकादशोक्तेर्भक्त्युद्देशकभक्तिकरणमुचितमेवेत्यतोऽन्यस्मिन् खलुभक्त्यतिरिक्त इति। यथात्रान्याभिलाषशून्यत्वं विहायान्याभिलाषिताशून्यमिति स्वभावार्थकताच्छील्यप्रत्ययेन कस्यचिद्भक्तस्य कदाचिच्छङ्कटे प्राप्ते—हे भगवन् भक्तं मामेतद्विपत्तेः सकाशाद् रक्षेति कादाचित्काभिलाषसत्त्वेऽपि न क्षतिः। यतस्तस्य वैवश्यहेतुकस्वभावविपर्ययेणैव तादृगाभिलाषो नतु स्वाभाविक इति बोध्यम्।

पुनः कीदृशम् ज्ञानकर्माद्यनावृतम्—ज्ञानमत्र निर्भेदब्रह्मानुसन्धानं, नतु भजनीयतत्त्वानुसन्धानमपि तस्यावश्यापेक्षणीयत्वात्। कर्म—स्मार्तं नित्यनैमित्तिकादि, नतु भजनीयपरिचर्यादि तस्य तदनुशीलनरूपत्वात्। आदिशब्देन फल्गुवैराग्ययोगसाङ्ख्याभ्यासादयस्तैरनावृतं नतु शून्यमित्यर्थः। तेन च भक्त्यावरकाणामेव ज्ञानकर्मादीनां निषेधोऽभिप्रेतः। भक्त्यावरकत्वं नाम विधिशासनान्नित्यकर्माकरणे प्रत्यवायादि भयाच्छ्रद्धया क्रियमाणत्वं तथा भक्त्यादिरूपेष्टसाधनत्वाच्छ्रद्धया क्रियमाणत्वञ्च। तेन लोकसङ्ग्रहार्थमश्रद्धयापि पित्रादिश्राद्धाङ्गं कूर्वतां महानुभावानां शुद्धभक्तौ नाव्याप्तिः। अत्र श्रीकृष्णानुशीलनं कृष्णभक्तिरिति वक्तव्ये भगवच्छास्त्रेषु केवलस्य भक्तिशब्दस्य तत्रैव विश्रान्तिरित्यभिप्रायात्तथोक्तम्।।१।।

---

> सा भक्तिः साधनभक्तिर्भावभक्तिः प्रेमभक्तिरिति त्रिविधा।
> साधनभक्तिः पुनर्वैधीरागानुगाभेदेन द्विविधा।।

सा भक्तिरिति। अथात्र साधनसाध्यरूपो द्विविधो भेद एवास्तु भावस्यापि साध्यभक्त्यन्तर्भावोऽस्तु किं भेदत्रयकरणेनेति चेन्न। यतोऽग्रे वक्ष्यमाणस्य—

> उत्पन्नरतयः सम्यङ् नैर्विघ्न्यमनुपागताः।
> कृष्णसाक्षात्कृतौ योग्याः साधकाः परिकीर्तिताः।।भ.र.सि. २.१.२७६।।

इति साधकभक्तलक्षणस्य मध्ये रत्यपरपर्यायस्य भावस्याविर्भावेऽपि सम्यङ्नैर्विघ्न्यमनुपागता इति विशेषणेन प्रबलतरस्य कस्यचिदपराधस्य कश्चन भागोऽवशिष्टोऽस्तीति लभ्यते। एवं सति

क्लेशजनकस्यापराधस्य लेशेऽपि साध्यभक्तेराविर्भावो न संभवति। अतएव तत्रैवोक्तस्य साध्यभक्तिविशिष्टसिद्धभक्तलक्षणस्य मध्ये अविज्ञाताखिलक्लेशाः सदा कृष्णाश्रिताक्रियाः सिद्धाः स्युरित्यनेन तथैव प्रतिपादितं। तस्माद्भावस्य साध्यभक्तेरन्तर्भावो न संभवति। तथैव साधनभक्तेरन्तर्भावस्तु सुतरामेव नास्ति। यतोऽत्रैव प्रकरणे साधनभक्तिलक्षणे भावसाधनत्वरूपविशेषणेन भावस्य साधनभक्तित्वं परास्तं। भावस्य भावसाधनत्वाभावात्। तस्मात् साधूक्तं भक्तेस्त्रिविधत्वमिति विवेचनीयं।।२।।

---

आदौ श्रद्धा ततः साधुसङ्गोऽथ भजनक्रिया।
ततोऽनर्थनिवृत्तिः स्यात्ततो निष्ठा रुचिस्ततः।
अथासक्तिस्ततो भावस्ततः प्रेमाभ्युदञ्चति।
साधकानामयं प्रेम्नः प्रादुर्भावे भवेत् क्रमः।।

अत्र बहुष्वपि क्रमेषु सत्सु प्रायिकमेकं क्रममाह आदावितिद्वयेन। आदौ प्रथमसाधुसङ्गे शास्त्रश्रवणद्वारा श्रद्धा तदर्थविश्वासः। ततः श्रद्धानन्तरं द्वितीयः साधुसङ्गो भजनरीतिशिक्षार्थं। निष्ठा भजने अविक्षेपेण सातत्यं किन्तु बुद्धिपूर्विकेयं। आसक्तिस्तु स्वारसिकी। एतेन निष्ठासक्त्योर्भेदो ज्ञेयः।।३।।

---

## अथ भजनस्य चतुःषष्टिरङ्गानि

श्रीगुरुपादाश्रयः, श्रीकृष्णदीक्षाशिक्षादि, श्रीगुरुसेवा, साधुमार्गानुसारः, भजनरीतिप्र[illegible]ः, श्रीकृष्णप्रीतये भोगादित्यागः, तीर्थवासः, तीर्थमाहात्म्यश्रवणं च, स्वभक्तिनिर्वाहानुरूपभोजनादिस्वीकारं, एकादशीव्रतम्, अश्वत्थतुलसीधात्रीगोब्राह्मणवैष्णवसम्मानं—पूर्वदशग्रहणम्।

परदशत्यागः—असाधुसङ्गत्यागः, बहुशिष्यकरणत्यागः, बह्वारम्भत्यागः, बहुशास्त्रव्याख्याविवादादित्यागः, व्यवहारे कार्पण्यत्याग, शोकक्रोधादित्यागः, देवतान्तरनिन्दात्यागः, प्राणिमात्रे उद्वेगत्यागः, सेवापराधनामापराधत्यागः, गुरुकृष्णभक्तनिन्दासहनत्यागः।

वैष्णवचिह्नधारणं, हरिनामाक्षरधारणं, निर्माल्यधारणं, नृत्यं, दण्डवत्प्रणामं, अभ्युत्थानम्, अनुव्रज्या, श्रीमूर्तिस्थाने गमनं, परिक्रमा, पूजा, परिचर्या, गीतं, सङ्कीर्तनं, जपः, स्तवपाठः, महाप्रसादसेवा, विज्ञप्तिः, चरणामृतपानं, धूपमाल्यादिसौरभग्रहणं, श्रीमूर्तिदर्शनं, श्रीमूर्तिस्पर्शनं, आरात्रिकदर्शनं, श्रवणं, तत्कृपापेक्षणं, स्मरणं, ध्यानं, दास्यं, सख्यं, आत्मनिवेदनं, निजप्रियवस्तुसमर्पणं, कृष्णार्थे समस्तकर्मकरणम्।

सर्वथा शरणापत्तिः, तुलसीसेवा, वैष्णवशास्त्रसेवा, मथुरामण्डले वासः, वैष्णवसेवा, यथाशक्तिदोलादिमहोत्सवकरणं, कार्त्तिकव्रतं, सर्वदा हरिनामग्रहणं, जन्माष्टमीयात्रादिकञ्च, एवं ऊनषष्टिभक्त्यङ्गानि। अथ तत्र पञ्चङ्गानि सर्वतः श्रेष्ठानि यथा—श्रीमूर्तिसेवाकौशलं, रसिकैः सह श्रीभागवतार्थास्वादः, सजातीयस्निग्धमहत्तरसाधुसङ्गः, नामसङ्कीर्तनं, श्रीवृन्दावनवासः। एवं मिलित्वा चतुःषष्ट्यङ्गानि।।४।।

---

कृष्णदीक्षादीति—दीक्षापूर्वकशिक्षणमित्यर्थः। श्रीकृष्णेति—श्रीकृष्णप्राप्तेर्यो हेतुः कृष्णप्रसादस्तदर्थमित्यर्थः। आदिग्रहणाल्लोकवित्तपुत्रादयो गृह्यन्ते। सेवानामापराधेति—सेवानामापराधानामुद्भवः साधकस्य प्रायोभवत्येव, किन्तु पश्चाद् यत्नेन तेषामभावकारिता।

## अथ द्वात्रिंशत् सेवापराधा र्वज्ञनीयाः

यथा आगमे—

यानैर्वा पादुकैर्वापि गमनं भगवद्गृहे।
देवोत्सवाद्यसेवाच अप्रणामस्तदग्रतः।।
उच्छिष्टे वाप्यशौचे वा भगवद्वन्दनादिकम्।
एकहस्तप्रणामश्च तत्पुरस्तात्प्रदक्षिणम्।।
पादप्रसारणंचाग्रे तथा पर्यङ्कबन्धनम्।
शयनं भक्षणंचापि मिथ्याभाषणमेव च।।
उच्चैर्भाषा मिथो जल्प रोदनादि तदग्रतः।
निग्रहानुग्रहौ चैव निष्ठुरक्रूरभाषणम्।।
कम्बलावरणञ्चैव परनिन्दा परस्तुतिः।
अश्लीलभाषणञ्चैव अधोवायुविमोक्षणम्।।
शक्तौ गौणोपचारश्च अनिवेदितभक्षणम्।
तत्तत्कालोद्भवानाञ्च फलादीनामनर्पणम्।।
विनियुक्तावशिष्टस्य व्यञ्जनादेः समर्पणम्।
पृष्ठीकृत्यासनञ्चैव परेषामभिवन्दनम्।।
गुरौ मौनं निजस्तोत्रं देवतानिन्दनं तथा।
अपराधास्तथा विष्णोर्द्वात्रिंशत् परिकीर्तिताः।।

वाराहे चापराधश्च तेऽपि सङ्क्षिप्य लिख्यन्ते यथा—राजान्नभक्षनं, ध्वान्तागारे हरेः स्पर्शः, विधिं विना हर्यूपसर्पणं, वाद्यं विना तद्द्वारोद्घाटनं, कुक्कुरादिदुष्टभक्ष्यसङ्ग्रहः, अर्चने मौनभङ्गः, पूजाकाले विड्उत्सर्गाय गमनं, गन्धमाल्यादिकमदत्त्वा धूपनम्, अनर्हपुष्पेण पूजनम्।

अकृत्वा दन्तकाष्ठञ्च कृत्वा निधुवनं तथा।
स्पृष्ट्वा रजस्वलां दीपं तथा मृतकमेव च।।
रक्तं नीलमधौतञ्च पारक्यं मलिनं पटं।
परिधाय मृतं दृष्ट्वा विमुच्यापानमारुतम्।।
क्रोधं कृत्वा श्मशानञ्च गत्वा भुक्त्वाप्यजीर्णभुक्।
भुक्त्वा कुसुम्भं पिण्याकं तैलाभ्यङ्गं विधाय च।
हरेः स्पर्शो हरेः कर्मकरणं पातकावहं।।

तथा तत्रैवान्यत्र—भगवच्छास्त्रानादरपूर्वकमन्यशास्त्रप्रवर्तनम्, श्रीमूर्तिसम्मुखे ताम्बूलचर्वणम्, एरण्डादिपत्रस्थपुष्पैरर्चनम्, आसुरकाले पूजा, पीठे भूमौ वा उपविश्य पूजनम्; स्नपनकाले वामहस्तेनतत्स्पर्शः, पर्युषितैर्याचितैर्वा पुष्पैरर्चनम्, पूजायां निष्ठीवनम्, तस्यां स्वगर्वप्रतिपादनम्, तिर्यक्पुण्ड्रधृतिः, अप्रक्षालितपादत्वेऽपि तन्मन्दिरप्रवेशः, अवैष्णवपक्वनिवेदनम्, अवैष्णवदृष्टेन पूजनम्, विघ्नेशमपूजयित्वा कपालिनं दृष्ट्वा वा पूजनम्, नखाम्भःस्नपनम्, घर्माम्बुलिप्तत्वेऽपि पूजनम्, निर्माल्यलङ्घनम्, भगवच्छपथादयोऽन्ये च ज्ञेयाः।।५।।

---

सर्वापराधकृदपि मुच्यते हरिसंश्रयः।
हरेरप्यपराधान् यः कुर्याद् द्विपदपांसवः।।
नामाश्रयः कदाचित् स्यात् तरत्येव स नामतः।
नाम्नोऽपि सर्वसुहृदो ह्यपराधात् पतत्यधः।।६।।

---

अथ नामापराधा दश। यथा—वैष्णवनिन्दादिवैष्नवापराधः, विष्णुशिवयोः पृथगीश्वरबुद्धिः, श्रीगुरुदेवे मनुष्यबुद्धिः, वेदपुराणादिशास्त्रनिन्दा, नाम्नि अर्थवादः, नाम्नि कुव्याख्या वा कष्टकल्पना, नामबलेन पापे प्रवृत्तिः, अन्यशुभकर्मभिर्नामसाम्यमननम्, अश्रद्धजने नामोपदेशः, नाममाहात्म्ये श्रुतेऽपि अप्रीतिः—इति दशधा।।७।।

---

अथ वैधीलक्षनं। श्रवणकीर्तनादीनि शास्त्रशासनभयेन यदि क्रियन्ते तदा वैधीभक्तिः।।

अथात्र साधनादौ प्रवृत्तिसामान्ये कुत्रचित् लोभस्य कारणत्वं कुत्रचित् शास्त्रशासनस्य। तत्र च यस्यां भक्तौ लोभस्य कारणत्वं नास्ति किन्तु शास्त्रशासनस्यैव सा वैधीत्याह यत्रेति। रागोऽत्र श्रीमूर्तेर्दर्शनाद्दशमस्कन्धीयतत्तल्लीलाश्रवणाद्व्रजने लोभस्तदनवाप्तत्वात्तदनधीनत्वाद्धेतोः शास्त्रस्य शासनेनैव या प्रवृत्तिरूपजायते सा भक्तिर्वैधी उच्यते।।८।।

---

अथ रागानुगालक्षणं। निजाभिमतव्रजराजनन्दनस्य सेवा प्राप्तिलोभेन यदि तानि क्रियन्ते तदा रागानुगा भक्तिः। यदुक्तं–

सेवा साधकरूपेण सिद्धरूपेण चात्र हि।
तद्भावलिप्सुना कार्या व्रजलोकानुसारतः।।

साधकरूपेण यथावस्थितदेहेन, सिद्धरूपेण अन्तश्चिन्तिताभीष्टतत्सेवोपयोगिदेहेन। तस्य व्रजस्थस्य श्रीकृष्णप्रेष्ठस्य यो भावो रतिविशेषस्तल्लिप्सुना। व्रजलोकास्तत्तत्कृष्णप्रेष्ठजनाः श्रीराधाललिताविशाखारूपमञ्जर्याद्यास्तदनुगताः श्रीरूपगोस्वामिप्रभृतयश्च तेषामनुसारतः। तथा च सिद्धरूपेणा मानसी सेवा श्रीराधाललिताविशाखाश्रीरूपमञ्जर्यादीनामनुसारेण कर्तव्या। साधकरूपेण कायिक्यादिसेवा तु श्रीरूपसनातनादिव्रजवासिनामनुसारेण कर्तव्येत्यर्थः। एतेन व्रजलोकपदेन व्रजस्थश्रीराधाललिताद्या एवग्राह्यास्तासामनुसारेणैव साधकदेहेन कायिक्यादिसेवापि कर्तव्या।

एवं सति ताभिर्गुरुपदाश्रयणैकादशीव्रतशालग्रामतुलसीसेवादयो न कृतास्तदनुगतेरस्माभिरपि न कर्तव्या इत्याधुनिकानां विमतमपि निरस्तम्। अतएव श्रीजीवगोस्वामिचरणैरपि अस्य ग्रन्थस्य टीकायां तथैवोक्तम्। यथा–व्रजलोकास्तत्तत्कृष्णप्रेष्ठजनास्तदनुगताश्च इति।।

कृष्णं स्मरन् जनञ्चास्य प्रेष्ठं निजसमीहितम्।
तत्तत्कथारतश्चासौ कुर्याद्वासं व्रजे सदा।।भ.र.सि. १.२.२९४।।

अथ रागानुगायाः परिपाटीम आह कृष्णमित्यादिना। प्रेष्ठं स्वप्रियतमं किशोरं नन्दनन्दनं स्मरन्। एवमस्य कृष्णस्य तादृशभक्तजनम्। अथच स्वस्य सम्यगीहितं स्वसमानवासनमिति यावत्। तथा च तादृशं जनं स्मरन् व्रजे वासं सदा कुर्यात्। सार्मथ्ये सति श्रीमन्नन्दव्रजावासस्थानवृन्दावनादौ शरीरेण वासं कुर्यात्। तदभावे मनसापीत्यर्थः।।९।।

---

तत्र रागानुगायां स्मरणस्य मुख्यत्वम्। तच्च स्मरणं निजभावो चिल्लीलावेशस्वभावस्य श्रीकृष्णस्य तत्प्रियजनस्य च। तथैव कीर्तनादिकमपि अर्चनादावपि मुद्रान्यासादिद्वारकाध्यानादिरुक्मिण्यादिपूजादिकमपि निजभावप्रातिकूल्यादागमादिशास्त्रविहितमपि न कुर्यादिति, भक्तिमार्गे किञ्चित् किञ्चित् अङ्गवैकल्येऽपि दोषाभावस्मरणात्।

न ह्यङ्गोपक्रमे ध्वंसो मद्धर्मस्योद्धवाण्वपि।
मया व्यवसितः सम्यङ निर्गुणत्वादनाशिषः।।भा.पु. ११.२९.२०।।

अङ्गिवैकल्ये त्वस्त्येव दोषः। यदुक्तं–

श्रुतिस्मृतिपुराणादिपञ्चरात्रविधिं विना।
ऐकान्तिकी हरेर्भक्तिरुत्पातायैव कल्पते।।

यदि चान्तरे रागो वर्तते, अथच सर्वमेव विधिदृष्ट्यैव करोति, तदा द्वारकायां रुक्मिण्यादित्वं प्राप्नोति।।१०।।

---

अत्रायं विवेक: व्रजलीलापरिकरस्थशृङ्गारादिभावमाधुर्ये श्रुते 'इदं ममापि भूयात्' इति लोभोत्पत्तिकाले शास्त्रयुक्त्यपेक्षा न स्यात्। तस्यांच सत्यां लोभत्वस्यैवासिद्धेः। न हि केनचित् कुत्रचित् शास्त्रदृष्ट्या लोभ: क्रियते। किन्तु लोभ्ये वस्तुनि श्रुते दृष्टे वा स्वत एव लोभ उत्पद्यते। ततश्च तद्भावप्राप्त्युपायजिज्ञासायां शास्त्रापेक्षा भवेत्। शास्त्र एवं प्राप्त्युपायलिखनात् नान्यत्र। तच्च शास्त्रं भजनप्रतिपादकम् श्रीभागवतमेव।

तेषु भजनेष्वपि मध्ये कानिचित् तद्भावमयानि, कानिचित् तद्भावसम्बन्धीनि, कानिचित् तद्भावानुकूलानि, कानिचित् तद्भावाविरुद्धानि, कानिचित् तद्भावप्रतिकूलानीति पञ्चविधानि साधनानि। तत्र दास्यसख्यादीनि भावमयान्येव। गुरुपदाश्रयतो मन्त्रजपादीनि तथा प्रेष्ठस्य निजसमीहितस्य तत्प्रियजनस्य च समयोचितानां लीलागुणरूपनाम्नां श्रवणकीर्तनस्मरणानि विविधपरिचरणानि च भावसम्बन्धीनि।

तत्प्राप्त्युत्कण्ठायामेकादशीजन्माष्टमीकार्त्तिकव्रतभोगत्यागादीनि तपोरूपाणि तथाश्वत्थतुलस्यादि सम्माननादीनि तद्भावानुकूलान्येव। नामाक्षरमाल्यनिर्माल्यादिधारणप्रणामादीनि तद्भावाविरुद्धानि। उक्तान्येतानि सर्वाणि कर्माणि कर्तव्यानि। न्यासमुद्राद्वारकादिध्यानादीनि तद्भावप्रतिकूलानि रागानुगायां वर्जनीयानि। एवं स्वाधिकारोचितानि शास्त्रेषु विहितानि कर्तव्यानि, निषिद्धानि तु सर्वाणि वर्जनीयानि।।११।।

---

अथ साधनभक्तिपरिपाकेन कृष्णकृपया तद्भक्तकृपया वा भावभक्तिर्भवति। तस्य चिह्नानि नवप्रीत्यङ्कुरा:, यथा—

क्षान्तिरव्यर्थकालत्वं विरक्तिर्मानशून्यता।
आशाबन्ध: समुत्कण्ठा नामगाने सदारुचि:।।
आसक्तिस्तद्गुणाख्याने प्रीतिस्तद्वसतिस्थले।
इत्यादयोऽनुभावा: स्युर्जातभावाङ्कुरे जने।।भ.र.सि. १.३.२५-२६।।

तदा कृष्णसाक्षात्कारयोग्यता भवति। मुमुक्षुप्रभृतिषु यदि भावचिह्नं दृश्यते तदा भावबिम्ब एव नतु भाव:। अज्ञजनेषु भावच्छाया।।१२।।

भावभक्तिपरिपाक एव प्रेमा। तस्य चिह्नम्—विघ्नादि सम्भवेऽपि किञ्चिन्मात्रस्यापि न ह्रासः। ममत्वातिशयात् प्रेम्न एव उपरितनोऽवस्थाविशेषः स्नेहः। तस्य चिह्न, चित्तद्रवीभावः। ततो रागः, तस्य लक्षणं निविडस्नेहः। ततः प्रणयः, तस्य लक्षणं गाढविश्वासः।।१३।।

विभावानुभावसात्त्विकभावव्यभिचारिभावमिलनेन रसो भवति। यत्र विषये भावो भवति स विषयालम्बनविभावः कृष्णः। यो भावयुक्तो भवति स आश्रयालम्बनविभावो भक्तः।

ये कृष्णं स्मारयन्ति वस्त्रालङ्कारादयस्ते उद्दीपनविभावाः। ये भावं ज्ञापयन्ति ते अनुभावा नृत्यगीतस्मितादयः।

ये चित्तं तनुं च क्षोभयन्ति ते सात्त्विकाः। ते अष्टौ—स्तम्भस्वेदरोमाञ्चस्वरभेदवेपथुवैवर्ण्याश्रुप्रलया इति। ते धूमायिता ज्वलिता दीप्ता उद्दीप्ता सूद्दीप्ता इति पञ्चविधा यथोत्तरसुखदाः स्युः। एते यदि नित्यसिद्धे तदा स्निग्धाः। यदि जातरतौ तदा दिग्धाः। भावशून्यजने यदि जातास्तदा रुक्षाः। मुमुक्षुजने यदि जातास्तदा रत्याभासजाः। कर्मिजने विषयिजने वा यदि जातास्तदा सत्त्वाभासजाः। पिच्छिलचित्तजने तदभ्यासपरे वा यदि जातास्तदा निःसत्त्वाः। भगवद्द्वेषि जने यदि जातास्तदा प्रतीपाः।।१४।।

अथ व्यभिचारिणः स्थायिभावपोषका भावाः कदाचित्काः।

> निर्वेदोऽथ विषादो दैन्यं ग्लानिश्रमौ च मदगर्वौ।
> शङ्कात्रासावेगा उन्मादापस्मृती तथा व्याधिः।।
> मोहो मृतिरालस्यं जाड्यं व्रीडावहित्था च।
> स्मृतिरथ वितर्कचिन्तामतिधृतयो हर्ष उत्सुकत्वं च।।
> औग्र्यमर्षासूयाश चापल्यं चैव निद्रा च।
> सुप्तिर बोध इतीमे भावा व्यभिचारिणः समाख्याताः।।भ.र.सि. २.४.४-६।।

अथैषाम्-लक्षणम्—आत्मनिन्दा निर्वेदः। अनुतापो विषादः। आत्मनि अयोग्यबुद्धिर्दैन्यम्। श्रमजन्यदौर्बल्यं ग्लानिः। नृत्याद्युत्थः स्वेदः श्रमः। मदो मधुपानादि मत्तता। अहङ्कारो गर्वः। अनिष्टाशङ्कनं शङ्का। अकस्मादेव भयं त्रासः। चित्तसम्भ्रम आवेगः। उन्मत्तता उन्मादः। अपस्मारो व्याधिरपस्मृतिः। ज्वरतापो व्याधिः। मूर्च्छैव मोहः। मृतिर्मरणम्। आलस्यमस्पष्टम्। जाड्यं जडता। लज्जैव व्रीडा। आकारगोपनमवहित्था। पूर्वानुभूतवस्तुस्मरणं स्मृतिः। अनुमानं वितर्कः। किं भविष्यतीति भावना चिन्ता। शास्त्रार्थनिर्धारणं मतिः। धृतिर्धैर्यम्। हर्ष आनन्दः। उत्कण्ठैव औत्सुक्यम्। तीक्ष्णस्वभावता औग्र्यम्। असहिष्णुता अमर्षः। गुणेऽपि दोषारोपणमसूया। स्थैर्ये

अशक्तिश्चापल्यम्। सुषुप्तिरेव निद्रा। स्वप्नदर्शनं सुप्तिः। जागरणं बोधोऽविद्याक्षयश्च इति व्यभिचारिणः।।१५।।

---

किञ्च भक्तानां चित्तानुसारेण भावानां प्राकट्यतारतम्यं भवति। तत्र क्वचित् समुद्रवद्गम्भीरचित्तेऽपि अप्राकट्यम् स्वल्पप्राकट्यं वा। अल्पखातवत्तरलचित्ते अतिशयप्राकट्यं च भवतीति नायमात्यन्तिकनियम इति प्रपञ्चो न लिखितः।।१६।।

---

सामान्यरूपः स्वच्छरूपश्च शान्तादिपञ्चविधरूपश्च। एकैकरसनिष्ठभक्त सङ्गरहितस्य सामान्यजनस्य सामान्यभजनपरिपाकेण सामान्यरतिरूपश्च स्थायी भावो यो भवति स सामान्यरूपः। शन्तादिपञ्चविधभक्तेश्वपि अविशेषेण कृतसङ्गस्य तत्तद्भजनपरिपाकेण पञ्चविधा रतिस्। तत्तद्भक्तसङ्गवसतिकालभेदेन योदयते, यथा कदाचित् शान्तिः कदाचित् दास्यं, कदाचित् सख्यं, कदाचित् वात्सल्यं, कदाचित् कान्ताभावश्च, न त्वेकत्र निष्ठत्वं तदा स्वच्छरतिरूपः।

अथ पृथक्पृथक् रसैकनिष्ठेषु भक्तेषु शान्त्यादिपञ्चविधरूपः। शान्तभक्तानां शान्तिः। दास्यभक्तानां दास्यरतिः। सख्यभक्तानां सख्यम्। वात्सल्यभक्तानां वात्सल्यम्। उज्ज्वलभक्तानां प्रियता। एवं शान्तदास्यसख्यवात्सल्योज्ज्वलाश्च पञ्चमुख्यरसा यथोत्तरं श्रेष्ठाः। शान्ते श्रीकृष्णनिष्ठबुद्धिवृत्तिता। दास्ये सेवा। सख्ये निःसम्भ्रमता। वात्सल्ये स्नेहः। उज्ज्वले सङ्गिसङ्गदानेन सुखमुत्पाद्यम्। एवं पूर्वपूर्वगुणादुत्तरोत्तरस्थाः श्रेष्ठाः स्युः।।१७।।

---

अथ शान्तरसे नराकृतिपरब्रह्म चतुर्भुजः नारायणः परमात्मा इत्यादिगुनः श्रीकृष्णो विषयालम्बनः। सनकसनन्दनसनातनसनत्कुमारादयः आश्रयालम्बनाः तपस्विनः। ज्ञानिनोऽपि मुमुक्षां त्यक्त्वा श्रीकृष्णभक्तकृपया भक्तिवासनायुक्ता यदि स्युस्तदा तेऽप्याश्रयालम्बनाः। पर्वतशैलकाननादिवासिजनसङ्गसिद्धक्षेत्रादयः उद्दीपनविभावाः। नासिकाग्रदृष्टिः अवधूतचेष्टा निर्ममता भगवद्द्वेषिजने न द्वेषः तद्भक्तजनेऽपि नातिभक्तिः मौनं ज्ञानशास्त्रेऽभिनिवेशः इत्यादयोऽनुभावाः। अश्रुपुलकरोमाञ्चाद्याः प्रलयवर्जिताः सात्त्विकाः। निर्वेदमतिधृत्यादयः सञ्चारिणः। शान्तिः स्थायी। इति शान्तरसः।।१८।।

---

अथ दास्ये रसे ईश्वरः प्रभुः सर्वज्ञः भक्तवत्सलः इत्यादिगुणवान् श्रीकृष्णो विषयालम्बनः। आश्रयालम्बनाश्चतुर्विधाः–अधिकृतभक्ताः आश्रिताः पार्षदाः अनुगाश्चेति। तत्र ब्रह्मा, शङ्कर इत्यादयोऽधिकृतभक्ताः। तत्र आश्रितास्त्रिविधाः शरण्याः ज्ञानिचराः सेवानिष्ठाः कालियजरासन्धमगधराजबद्धराजादयः शरण्याः। प्रथमतो ज्ञानिनोऽपि मुमुक्षां परित्यज्य ये दास्ये प्रवृत्तास्ते सनकादयो ज्ञानिचराः। ये प्रथमत एव भजने रतास्ते चन्द्रध्वजहरिहयबहुलाश्वादयः

सेवानिष्ठाः। उद्धवदारुकश्रुतदेवादयः पार्षदाः। सुचन्द्रमण्डनाद्याः पुरेः। रक्तकपत्रकमधुकण्ठादयो व्रजेऽनुगाः।

एषां सपरिवार एव कृष्णे ये यथोचितभक्तिमन्तस्ते धुर्यभक्ताः। ये कृष्णप्रेयसीवर्गे आदरयुक्तास्ते धीरभक्ताः। ये तु तत्कृपां प्राप्य गर्वेण कमपि न गणयन्ति ते वीरभक्ताः। एतेषु गौरवान्वितसम्भ्रमप्रीतियुक्तास्तु प्रद्युम्नसाम्बादयः श्रीकृष्णस्य पाल्याः। ते सर्वे केचिन्नित्यसिद्धाः, केचित् साधनसिद्धाः, केचित् साधकाः।

श्रीकृष्णानुग्रहचरणधूलीमहाप्रसादादय उद्दीपनविभावाः। श्रीकृष्णस्याज्ञाकरणादयोऽनुभावाः। प्रेमा रागः स्नेहश्चात्र रसे भवति। अधिकृतभक्ते आश्रितभक्ते च प्रेमपर्यन्तो भवति स्थायी। पार्षदभक्ते स्नेहपर्यन्तः। परीक्षिति दारुके उद्धवे रागः प्रकट एव। व्रजानुगे रक्तकादौ सर्व एव। प्रद्युम्नादावपि सर्व एव। यावत्पर्यन्तं श्रीकृष्णदर्शनं प्रथमतो भवति तावत्कालमयोगः। दर्शनानन्तरं यदि विच्छेदस्तदा वियोगः। तत्र दश दशाः। अङ्गेषु तापः कृशता जागर्या आलम्बनशून्यता अधृतिर्जडता व्याधिरुन्मादो मूर्च्छितं मृतिश्च। इति दास्यरसः।।१९।।

---

अथ सख्यरसे विदग्धो बुद्धिमान् सुवेशः सुखीत्यादिगुनः श्रीकृष्णो विषयालम्बनः। आश्रयालम्बनाः सखायश्चतुर्विधाः—सुहृदः सखायः प्रियसखायः प्रियनर्मसखायश्च। ये कृष्णस्य वयसाधिकास्ते सुहृदः किञ्चिद्वात्सल्यवन्तः। ते सुभद्रमण्डलीभद्रबलभद्रादयः। ये किञ्चिद्वयसा न्यूनास्ते किञ्चिद्दास्यमिश्राः सखायः। ते विशालवृषभदेवप्रस्थादयः। ये वयसा तुल्यास्ते प्रियसखायः श्रीदामसुदामवसुदामादयः। ये तु प्रेयसीरहस्यसहायाः शृङ्गारभावस्पृहास्ते प्रियनर्मसखायः सुबलमधुमङ्गलार्जुनादयः। श्रीकृष्णस्य कौमारपौगण्डकैशोरान् वयांसि शृङ्गवेणुदलवाद्यादयश्च उद्दीपन विभावाः। तत्र प्रमाणं—

> कौमारं पञ्चमाब्दान्तं पौगण्डं दशमावधि।
> कैशोरमापञ्चदशं यौवनं तु ततः परम्।।

अष्टमासाधिकदशवर्षपर्यन्तं श्रीकृष्णस्य व्रजे प्रकटविहारः। अतएव श्रीकृष्णस्याल्पकालत एव वयोवृद्ध्या मासचतुष्टयाधिकवत्सरत्रयपर्यन्तं कौमारम्। ततः परमष्टमासाधिकषड्वर्षपर्यन्तं पौगण्डम्। ततः परमष्टमासाधिकदशवर्षपर्यन्तं कैशोरम्। ततः परमपि सर्वकालं वाप्य कैशोरमेव। दशवर्षं शेषकैशोरम्। तत्रैव सदा स्थितिः। एवं सप्तमे वर्षे वैशाखे मासि कैशोरारम्भः। अतएव प्रसिद्धः पौगण्डमध्ये प्रेयसीभिः सह विहारः। तासामपि तथाभूतत्वादिति प्रसङ्गात् लिखितम्।

सख्ये बाहुयुद्धखेला एकशय्याशयनादयोऽनुभावाः। अश्रुपुलकादयः सर्वे एव सात्त्विकाः। हर्षगर्वादयः सञ्चारिणः साम्यदृष्ट्या निःसम्भ्रमतामयः विश्वासविशेषः सख्यरतिः स्थायी भावः। अथ प्रणयः प्रेमा स्नेहो रागः सख्येन सह पञ्चविधः स्यात्। अन्यत्र अर्जुनभीमसेनश्रीदामविप्राद्याः

सखायः। तत्रापि वियोगे दश दशाः पूर्वत् ज्ञातव्याः। इति सख्यरसः।।२०।।

अथ वात्सल्यरसे कोमलाङ्गो विनयी सर्वलक्षणयुक्त इत्यादिगुणः श्रीकृष्णो विषयालम्बनः। श्रीकृष्णे अनुग्राह्यभाववन्तः पित्रादयो गुरुजना अत्र व्रजे व्रजेश्वरीव्रजराजरोहिण्युपनन्दतत्पत्न्यादयः। अन्यत्र देवकीकुन्तीवसुदेवादयश्च आश्रयालम्बनाः। स्मितजल्पितबाल्यचेष्टादय उद्दीपनविभावाः। मस्तकाघ्राणाशीर्वादलालनपालनादयोऽनुभावाः। सात्त्विकाः स्तम्भस्वेदादयः सर्व एव स्तनस्रवणमिति नवसङ्ख्याः। हर्षशङ्काद्या व्यभिचारिणः। वात्सल्यरतिः स्थायी भावः। प्रेमस्नेहरागाश्चात्र भवन्ति। अत्रापि वियोगे पूर्ववत् दश दशाः। इति वात्सल्यरसः।।२१।।

अथ मधुररसे रूपमाधुर्यलीलामाधुर्यप्रेममाधुर्यसिन्धुः श्रीकृष्णो विषयालम्बनः। प्रेयसीगणः आश्रयालम्बनः। मुरलीरववसन्तकोकिलनादनवमेघमयूरकण्ठादिदर्शनाद्या उद्दीपनविभावाः। कटाक्षहास्यादयोऽनुभावाः। सर्व एव सात्त्विकाः सूद्दीप्तपर्यन्ताः। निर्वेदाद्याः सर्वे आलस्यौग्र्यरहिताः सञ्चारिणः। प्रियतारतिः स्थायी भावः। प्रेमस्नेहरागाद्याः श्रीलोज्ज्वलनीलमण्युक्ताः सर्व एव भवन्ति। इति मधुररसः।।२२।।

अथ भावमिश्रणम्। श्रीबलदेवादीनां सख्यं वात्सल्यं दास्यञ्च। मुखरा प्रभृतीनां वात्सल्यं सख्यञ्च। युधिष्ठिरस्य वात्सल्यं सख्यञ्च। भीमस्य सख्यं वात्सल्यञ्च। अर्जुनस्य सख्यं दास्यञ्च। नकुलसहदेवयोर्दास्यं सख्यञ्च। उद्धवस्य दास्यं सख्यञ्च। अक्रूरोग्रसेनादीनां दास्यं वात्सल्यञ्च। अनिरुद्धादीनां दास्यं सख्यञ्च।।२३।।

अथ हास्याद्भुतवीरकरुणरौद्रभयानकवीभत्साः सप्तगौणभक्तिरसाः पञ्चविधभक्तेष्वेवोदयन्ते। अतएव पञ्चविधभक्ता आश्रयालम्बनाः। हास्यादीनां षण्णां रसानां श्रीकृष्णश्च श्रीकृष्णभक्ताश्च तत्सम्बन्धिनश्च विषयालम्बनाः। वीभत्सस्य तु घृणास्पदामेध्यमांस शोणितादयो विषयाः। रौद्र भयानकयोः श्रीकृष्णशत्रवोऽपि विषयाः। गण्डविकाश नेत्रविस्फारादयो यथा सम्भवमनुभावाः। सात्त्विका अपि यथा सम्भवं द्वित्राः। हर्षामर्याद्या व्यभिचारिणः। हासो विस्मय उत्साहः क्रोधशोकौ भयं तथा जुगुप्सा चेत्यसौ भावविशेषः सप्तधोदितः। हास्यादीनामयी क्रमेण स्थायिभावाः। किञ्च वीररसे युद्धदानदयाधर्मेषु उत्साहवशात् युद्धवीरः, दानवीरः, दयावीरः, धर्मवीर इति चतुर्द्धा वीररसः। इति सप्त गौणरसाः। एवं मिलित्वा द्वादशरसा भवन्ति।।२४।।

अथैषां मैत्रिवैरस्थितिः। शान्तस्य दासस्य परस्परं मैत्री। सख्यवात्सल्यौ तटस्थौ। वात्सल्यस्य न

केनापि मैत्री। उज्ज्वलदास्यरसौ शत्रू। इति मैत्रिवैरस्थितिः।।२५।।

अथैषां सप्तगौणानां पञ्चसु मुख्यरसेषु अन्तर्भावो, यथा–हास्ययुद्धवीरयोः सख्ये। अद्भुतस्य सर्वत्र। करुणादानवीरदयावीरराणां वात्सल्ये। भयानकस्य वात्सल्ये दास्ये च। वीभत्सस्य शान्ते। रौद्रस्य क्रोधरतिवात्सल्योज्ज्वलरसपरिवारेषु एकांशेनेत्यनेनैव परस्परं मैत्री वैरञ्च युक्त्या ज्ञेयम्।।२६।।

वैररसस्य स्मरणे राध्यत्वे वा विषयाश्रयभेदे वा उपमायां वा रसान्तरव्यवधानेन वा वर्णने सति न रसाभासः। अन्यथा तु परस्परवैरयोर्यदि योगस्तदा रसाभासः। यदि परस्परं मित्रयोगस्तदा सुरसता। मुख्यानां तु विषयाश्रयभेदेऽपि वैरयोगे रसाभास एव। एवमधिरूढमहाभावे केवलं श्रीराधायां तु वैरयोगेऽपि वर्णनपरिपाट्यां न रसाभासः।

किंच कृष्णो यदि स्वयमेकदैव सर्वरसानां विषयो वा आश्रयो वा तदापि न रसाभासः। अथान्येऽपि रसाभासाः केचित् ग्राह्यप्रायाः–श्रीकृष्णे यदि ब्रह्मतश्चमत्काराधिक्यं न भवति तदा शान्तरसाभासः। श्रीकृष्णाग्रे यदि दास्यातिधाष्टर्यं भवति तदा दास्यरसाभासः। द्वयोर्मध्ये एकस्य सख्यभावः अन्यस्य दास्यभावस्तदा सख्यरसाभासः। पुत्रादीनां बलाधिक्यज्ञानेन लालनाद्यकरणं वात्सल्यरसाभासः। द्वयोर्मध्ये एकस्य रमणेच्छान्यस्य नास्ति प्रकटमेव सम्भोगप्रार्थनं वा तदोज्ज्वलरसाभासः। श्रीकृष्णसम्बन्धवर्जिताश्चेत् हास्यादयस्तदा ते हास्यादिरसाभासाः। यदि श्रीकृष्णवैरिषु भवन्ति तदातिरसाभासाः।।२६।।

अनधीतव्याकरणश्चरणप्रवणो हरेर्जनो यस्मात्।
भक्तिरसामृतसिन्धुबिन्दुतो बिन्दुरूपेण।।

इति महामहोपाध्यायश्रीविश्वनाथचक्रवर्तिविरचितः भक्तिरसामृतसिन्धुबिन्दुः समाप्तः।।